एकदन्ताङ्ग्यो माता ह्रिता मिथुनोदया॥
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी।
ब्रह्माण्यमिव कीलाले पावको गन्धकर्षिणी"॥
इति तन्त्रशास्त्रम्॥ वामनासिका। इति वीजवर्णाभिधानम्॥ (मातृकान्यासेऽस्य वामनासिकया न्यस्ततया तथात्वम्। यदुक्तं मातृकान्यासमन्त्रे। "ॠं नमो दक्षिणघ्राणे ॠं नमो वामघ्राणे"। इति॥ अनुबन्धविशेषस्तेन चङ्यङ्ग्ह्रखो वा स्यात्। यदुक्तं कविकल्पद्रुमे। "चङ्यङ्ग्ह्रखोऽथ ॠर्वा ऌरङ्वानिर्वाथ एः सिचि"॥ (एतेन कण आर्त्तस्वरे लुङि कृते अचीकणत् अचकणत् इति स्यात्॥)

ॠ गि गत्यां। इति कविकल्पद्रुमः। (ग्रादि-क्र्यादिं-परं-सकं-सेट्।) गि ॠणाति। ईर्सः ईर्सिः। इति दुर्गादासः॥

ॠ, व्य, (ॠ+क्विप्।) वाक्यारम्भः। रक्षा। इति मेदिनी॥ निन्दा। भयम्। इति शब्दरत्नावली॥

ॠ, स्त्री, (ॠणातीति। ॠ+क्विप्।) वक्षः। इति मेदिनी॥

ॠः, स्त्री, देवमाता। दानवमाता। (ॠ+भावे क्विप्।) स्मृतिः। गतिः। इति मेदिनी॥

ॠः, पुं, (ॠणाति प्राप्नोति विश्वमिति। ॠ+क्विप्।) भैरवः। (यथा, "ॠनन्ददाक्षि! प्रमथेशसङ्गेः!।" इत्युद्भटः॥) दनुजः। इति मेदिनी॥

---

## ऌ

ऌ ऌकारः। स तु नवमस्वरवर्णः। अस्योच्चारणस्थानं दन्तः। (यदुक्तम् सिद्धान्तकौमुद्याम् "ऌतुलसानान्दन्ताः"। शिक्षायामपि यथा,—
"स्युर्मूर्द्धन्या ऋटुरसा दन्त्या ऌतुलसाः स्मृताः"।) स ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणम्॥ (अयन्तु उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदेन द्विधेति षड्विध एव॥)
"ऌकारं चञ्चलापाङ्गि कुण्डली परदेवता।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये॥
पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा।
पञ्चप्राणयुतं वर्णं तथा गुणत्रयात्मकम्॥
विन्दुत्रयात्मकं वर्णं पीतविद्युल्लता तथा"।
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"रेखाधःकुण्डली वक्रा दक्षतो वामतो गता।
वङ्गीशवायवस्तासु नित्यं सन्ति च नित्यशः"॥
इति वर्णोद्धारतन्त्रम्॥ * ॥ अस्य नामानि यथा,—
"ऌः स्थाणुः श्रीधरः शुद्धो मेधा धूम्रावको वियत्।
देवयोनिर्दक्षगण्डो महेशः कौन्तरुद्रकौ॥
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो लाङ्गलिः परा।
चन्द्रिका पार्थिवो धूम्रा द्विदन्तः कामवर्द्धनः॥
शुचिस्मिता च नवमी कान्तिरायातकेश्वरः।
चित्ताकर्षिणी कामस्य तृतीयकुलसुन्दरी"॥
इति तन्त्रशास्त्रम्॥ (मातृकान्यासे दक्षिणगण्डे न्यस्ततया दक्षिणगण्डेनाप्यभिधानम्। यथा मातृकान्यासमन्त्रे। "ऌं नमो दक्षिणगण्डे ऌं नमो वामगण्डे"। अनुबन्धविशेषः। एतेन लुङि अङ् स्यात्। यदुक्तम् कविकल्पद्रुमे।
"चङ्यङ्ग्ह्रखोऽथ ॠर्वा ऌरङ्वानिर्वाथ एः सिचि"।
एतेन गम् ऌ औ गतौ इत्यस्य लुङि अगमदिति स्यात्॥)

ऌ, व्य, देवमाता। इति मेदिनी एकाक्षरकोषश्च॥ भूमिः। कुध्रः। पर्व्वतः। इति मेदिनी॥

---

## ॡ

ॡ दीर्घ ऌकारः। स तु दशमस्वरवर्णः। अस्योच्चारणस्थानं दन्तः। (यथा मुग्धबोधे। "ऌत्रयं तथदधनलसाः वो दन्त्याः"।) स प्लुतश्च भवति। इति व्याकरणम्॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकानुनासिकभेदात् षड्विध एव।)
"ॡकारं परमेशानि पूर्णचन्द्रसमप्रभम्।
पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा॥
गुणत्रयात्मकं वर्णं तथा विन्दुत्रयात्मकम्।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"तत्कोड़तुल्यरूपा च रेखा सा वैष्णवी स्मृता।
तासु वन्द्याः सुरेशानि दुर्गा वाणी सरस्वती"॥
इति वर्णोद्धारतन्त्रम्॥ * ॥ तन्नामानि यथा,—
"ॡकारः कमला हर्षा हृषीकेशो मधुव्रतः।
सूक्ष्मा कान्तिर्व्वामगण्डो रुद्रः कामोदरी सुरा॥
शान्तिकृत् स्वस्तिका शक्रो मायावी लोलुपो वियत्।
कुशमी सुस्थिरो माता नीलपीतो गजाननः॥
कामिनी विश्वपा कालो नित्या शुद्धः शुचिः कृती।
सूर्य्यो धैर्य्योत्कर्षिणी च एकाकी दनुजप्रसूः"॥
इति तन्त्रशास्त्रम्॥ (मातृकान्यासे वामगण्डे न्यस्ततया तन्नाम्नाप्यभिधानम्। मातृकान्यासमन्त्रो यथा॥ "ॡं नमो दक्षिणगण्डे ॡं नमो वामगण्डे"॥ मुग्धबोधमते तन्त्रमते च ऌकारस्य दीर्घत्वमस्ति पाणिनिमते तु नास्ति। अत्रेदं ज्ञातव्यं ऌकारस्य दीर्घत्वाभावेऽपि "ऌति ऌवा" इति वार्त्तिकोक्तेः ॡकार एव तत्र विधेयः। तेन होतॄॡकार इत्यादौ ॡकारस्य व्यवहारः। मुग्धबोधेऽपि एतदनुसारेण एकमात्रद्विमात्रत्रिमात्रापेक्षा "ऌत्रयम्" इत्युक्तत्वेन न विरोधः॥)

ॡ, व्य, देवनारी। नार्य्यात्मा। माता। इति मेदिनी॥

ॡः, स्त्री, दैत्यस्त्री। इत्येकाक्षरकोषः॥ दनुजमाता। कामधेनुमाता। इति कश्चिदेकाक्षरकोषः॥

ॡः, पुं, सर्व्वः। महादेवः। इति कश्चिदेकाक्षरकोषः॥

---

## ए

ए एकारः। स तु एकादशस्वरवर्णः। अस्योच्चारणस्थानं तालुकण्ठश्च। (यदुक्तं सिद्धान्तकौमुद्याम्। "एदैतोः कण्ठतालु"। तथाच शिक्षायाम्। "ए ऐ तु कण्ठतालव्यावो औ कण्ठोष्ठजौ स्मृतौ"॥) स दीर्घः प्लुतश्च भवति। इति व्याकरणम्॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदात् षड्विध एव॥)
"एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम्।
रञ्जिनीकुसुमप्रख्यं पञ्चदेवमयं सदा॥
पञ्चप्राणात्मकं वर्णं तथा विन्दुत्रयात्मकम्।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रं॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा।
"कुञ्चिता वामतो रेखा दक्षकोणायता त्वधः।
पुनर्व्वामगता सैव तासु वङ्गीशवायवः"॥
इति वर्णोद्धारतन्त्रम्॥ * ॥ अस्य नामानि यथा।
"एकारो वासवः शक्तिर्झिण्टी सोष्ठो भगं मरुत्।
सूक्ष्मा भूतोऽर्द्धकेशी च ज्योत्स्ना श्रद्धा प्रमर्द्दनः।
भयं ज्ञानं कृशा धीरा जङ्घा सर्व्वसमुद्भवः।
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसः॥
योषिदाधारशक्तिश्च त्रिकोणा ईशसंज्ञकः।
सन्धिरेकादशी भद्रा पद्मनाभः कुलाचलः"॥
इति तन्त्रशास्त्रम्॥ * ॥ अन्यच्च।
"एकारो वामगण्डान्तः शक्तिर्झिण्टी भगन्तथा।
माद्यवीजश्च विजया ओष्ठ एकादशस्वरः"॥
इति वीजवर्णाभिधानम्॥ (मातृकान्यासेऽस्य ओष्ठस्थाने न्यस्ततया ओष्ठशब्देनाप्यभिधानम्। मातृकान्यासमन्त्रो यथा,—
"एं नम ओष्ठे ऐं नमोऽधरे"॥ इति। अनुबन्धविशेषः। तेन लुङि सिचि अवृद्धिः स्यात्। यथाह कविकल्पद्रुमे॥
　　"ऌरङ्वानिर्वाथ एः सिचि।
　　अवृद्धिः ऐयंजादिः स्यात्"॥
एतेन कटे वर्षावर्णयोरित्यस्य लुङि अकटीदिति स्यात्॥)

ए, व्य, स्मृतिः। असूया। अनुकम्पा। आमन्त्रणम्। आह्वानम्। इति मेदिनी॥

एः, पुं, (एति प्राप्नोति सर्व्वं विश्वमिति। इण्+अच्। "सर्व्वं विष्णुमयं जगत्" इति वाक्यादस्य तथात्वम्॥) विष्णुः। इत्येकाक्षरकोषः॥

एकं त्रि, (एतीति। इण गतौ। "इण्भीकापाशल्यतिमर्चिभ्यः कन्"॥३।४३। इत्युणादिसूत्रेण कन्।) मुख्यम्। अन्यत्। केवलम्। इत्यमरः॥ ("त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः"। इति मनौ१।३। "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतिः॥ "एकातपत्रं जगतः प्रभुत्वम्"। इति रघुवंशे२।४७। "ममात्र भावैकरसं मनः स्थिरम्" इति कुमारे ५।८२।) आदिसंख्या। इति मेदिनी। अथैकवाचकानि। परमात्मा १ विधुः २ क्षितिः ३ गणेशदन्तः ४ शुक्रचक्षुः ५। इति कविकल्पलता॥ अग्निः ६ सूर्य्यः ७ देवराजः ८ यमः ९। इति महाभारते वनपर्व्व॥ (सर्व्वनामशब्दोऽयम्। तथा च सिद्धान्तकौमुद्यां "सर्व्वादयश्च पञ्चत्रिंशत्" इत्युक्त्वा "त्यद्-तद्-यद् एतद्-इदम्-अदस्